श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ दशावतारस्तबकः एकविंशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ दशावतारस्तबकः एकविंशः ॥

दशस्वप्यवतारेषु देवो यद्रूप संप्लवात्।
साधयामास कार्याणि सतां तस्यै श्रियै नमः॥ **21.1** ॥

देवि त्वदालब्धदयारसेन
देवेन मात्स्यं वपुराश्रितेन।
आश्चर्यमष्टश्रुतिरप्यनष्ट
श्रुतित्वमापद्यत पद्मजन्मा॥ **21.2** ॥

भूयिष्ठां तव दृष्टिरेव कमले भूतिं चिरात् प्रोषितां
भूयोऽप्यानयति क्षणादिति नृणां व्यक्तं घृणावारिधिः।
देवस्तावकदृष्टिरूपमनघं मीनावतारे वहन्
धात्रेऽदत्त सतां श्रियं श्रुतिमयीं दैत्यापनीतां पुनः॥ **21.3** ॥

सा हि श्रीरमृता सतामिति ननु त्वन्नामधेयाश्रयात्
त्वद्दास्यं भजति श्रुतिः स्वयमिति प्राप्तादरः श्रीधरः।
तां मग्नां पुनरुद्धरन् जलनिधौ तापार्णवादुद्धरेत्
त्वद्दास्यैकधनान् जनानिति रमे धैर्यं चरीकर्ति नः॥ **21.4** ॥

देवो देवि त्वय्यसौ दानवानां
हन्ता हन्तामन्दरागं दधौ यः।
धर्मं कौर्मं धारयंस्त्वत्सहायो
मातः सोऽयं मन्दरागं दधाति॥ **21.5** ॥

उरसि सरसिजालये वहंस्त्वां
शिरसि दिधीर्षुरिलां त्वदंशभूताम्।
स्वयमयमचिरात् पराहतारिः
स हरिरुवाह वराहदिव्यदेहम्॥ **21.6** ॥

दैतेयेन बलात् पयोधिजठरं देवी मही प्रापिता
मातस्ते स्वसृभावमेव यदगादेकोदरस्थानतः।
तस्मादेव कृतादरेण तरसा दामोदरेण स्वयं
दध्रेऽसौ कुहनावराहवपुषा देवेन दंष्ट्राञ्चले॥ **21.7** ॥

पद्मे चक्रभृतो नृसिंहवपुषः प्रह्लादसंक्लेशन -
क्रूरापुण्य हिरण्यदेहदलना वेलातिवेलोदयः।
रोषाग्निः शमितस्त्वया बत पयोराश्येकशोष्योऽपि तत्
पुत्र्या शक्तिरुदेति कारणगता प्रायेण कार्येष्वपि॥ **21.8** ॥

शरण्यभूतां श्रुतिरिन्दिरे यां
हिरण्यवर्णां हरिणीमभाणीत्।
सा दिव्यसिंहस्य हिरण्यभेत्तुः
निःशङ्कमङ्के रमसे कथं त्वम्॥ **21.9** ॥

अवनमेव सदा कलयन् गज -
व्यसन भङ्गकृदद्भुतकेसरी।
हरिणलक्षणदृष्टिरयं त्वया -
ऽप्यबलयाम्ब गुणेन वशीकृतः॥ **21.10** ॥

हर्यक्षोऽयं हरिरिति वचस्त्वय्य नाभूतपूर्वं
न प्रह्लादोपचयकरता नो हिरण्याङ्गदत्वम्।
तस्मादस्मज्जननि परमं विस्मयं ते विधातुं
नाथोऽपूर्वं किमिह जगृहे नारसिंहं शरीरम्॥ **21.11** ॥

तत्तादृक्षहिरण्यदाननिरतौ भक्ताभिरक्षाकृते
सत्कीर्तिं हरितां मुखे खलजनत्रासावहामाश्रितौ।
किञ्चोदञ्चदनेकपापहरण क्रीडोचितालोकनौ
देवि स्तौमि मिथः समानचरितौ दिव्यौ युवां दम्पती॥ **21.12**॥

वक्षःस्थामपि वर्णितानुसृतये कृष्णाजिनेनावृणोत्
देवस्त्वामिति वर्णयन्ति कतिचिद् ब्रूमो वयं त्विन्दिरे।
भव्यं वामनरूपमेत्य भगवान् भाग्यं हरिष्यन् बलेः
एनं कर्तुमगोचरं शुभपुषां त्वद्वीक्षितानामिति॥ **21.13**॥

वर्णित्वमर्णवसुते वहतापि गूढं
वक्षःस्तटे हि न धृता वनमालिना चेत्।
कस्त्रीणि दास्यति पदान्यपि याचतेऽस्मै
कस्माज्जगत्त्रयतया च विवृद्धिरेषाम्॥ **21.14**॥

दैत्यादेत्य हि कुप्रतिग्रहमहो वृद्ध्या च पुष्णंस्तनुं
गोत्रघ्नावरजो मृषावटुरधः पातं च दातुर्दिशन्।
पात्राकारमगादघावलिहृतो ह्यम्ब ते धारणात्
धात्रा सङ्गृहे तदस्य शिवता सम्पादकं पादकम्॥ **21.15**॥

वासस्ते क्व वटो गुहास्वशनमप्याकाङ्क्षितं ते घनं
मां जानीह्यघनाशनादरमये किं ते विवाहे स्पृहा।
मा स्त्री मे दिश गां पदत्रयमितां लोकत्रयी सा ममे -
त्युक्तिर्दिव्यवटोर्निशम्य तदुरस्यम्ब त्वया सिष्मिये॥ **21.16**॥

श्रीमान्निःस्व इवैष वामनतनुः प्रत्यग्रहीद्गां क्रतौ
इत्थं दुग्धपयोधिजे तव परीहासोक्तिभिर्व्रीलितः।
अंशेनार्पितसन्निधिर्भृगुपतौ पूर्वावतारार्जितां
तामेनां पुनरध्वरे स भगवान्नूनं ददावृत्विजे॥ **21.17**॥

बाहाकल्पे भृगुकुलपतेर्वज्रकल्पे कुठारे
सङ्ग्रामेषु त्रियुगसखि ते सन्निधानं भजन्त्याः।
क्रोधोन्मेष क्षपितविमत क्षोणिपश्रेणिलक्षं
ग्रीवोत्थासृग्घुसृणमसृणं गात्रमत्यर्थशोणम्॥ **21.18**॥

बिभ्राणे स्वधितिं समिद्धरणतो मन्युप्रपोषक्षमं
लोकेशास्त्रविचक्षणे नृपकुले ज्याकर्मसंस्थाकरे।
भेजाते ननु दुर्घटार्थघटिनि त्वद्वीक्षणाद्भार्गवे
सामानाधिकरण्यमर्णवसुते ब्राह्मण्यराजन्यते॥ **21.19**॥

पञ्चास्यत्वजुषा पुरा भगवता योऽसौ हिरण्यासुरः
पञ्चत्वं गमितः स एव जननि स्पर्धाभिवृद्धाग्रहः।
भूत्वा तद्द्विगुणाननो जितजगद्भूयस्त्वदागोऽग्निना
दग्धो हन्त चतुर्मुखास्त्रनिहतोऽप्येकाननस्य प्रभोः॥ **21.20**॥

सप्ताश्वान्वयशालिना दशरथप्राप्तोदयेनापि ते
नेत्रापत्तिविवर्जितेन कमले मुक्तद्विपेन्द्रेण च।
निस्सङ्ख्याश्वकुलो रथायुतयुतो निःसीमपत्तिच्छटः
त्वद्द्रोहादगणेय कुञ्जरगणोऽप्यस्तो रणे रावणः॥ **21.21**॥

रघुवरकृतशङ्काभङ्गदम्भेन लङ्का -
ऽऽमिषभुगशुचिसद्मास्वादनैः कृष्णवर्त्मा।
अशुचिरिह भवत्या पावितो देवि सत्या
स वहति शुचिसंज्ञां तद्वदन्त्यन्यथाऽज्ञाः॥ **21.22**॥

अखण्डं कोदण्डं प्रभुरदलयत् खण्डपरशोः
अगृह्णाद्रामस्य प्रसभमपि चाखण्डपरशोः।
अबध्नादप्यम्भो निधिमथ दशग्रीवमवधीत्
महाश्चर्याश्चर्यास्त्वयि कृतधियोऽस्याम्ब सुकराः॥ **21.23**॥

सङ्कल्पतस्तव समीरसुते हि सीते
    शीतो बभूव दहनश्चिरमेधमानः।
मातर्जगद् भ्रमनिवृत्तिकृते विशन्त्यां
    शीतः कुतः स न भवेत्त्वयि देवि साक्षात्॥ **21.24** ॥

नीलाम्बरो हलधरो ननुहन्त भास्वत् -
    भूभेदनैकरसिकः शुभशालिवृत्तिः।
श्यामाकलाभरत एष विवृद्धमोहो
    भोगी बभूव भुवनाम्ब तव प्रसादात्॥ **21.25** ॥

श्यामा त्वमम्ब दयितश्च तवैव कृष्णः
    गाङ्गेययोगमुदितः स च रुक्मिणी त्वम्।
त्वं स्वादुवाक् स च युवा मधुरोदितश्रीः
    दाम्पत्यमेतदनुरूपमतो मिथो वाम्॥ **21.26** ॥

रामानुषङ्गविहृतौ रचिताभिलाषं
    मातस्त्रिलोचनजितं भवती मनोज्ञम्।
पित्रा समानगुणमात्मभुवं प्रसूय
    पुष्पायुधं कमपि रुक्मिणि लब्धहर्षा॥ **21.27** ॥

गम्भीर भावाहिकृतार्थक्लृप्त -
    सम्पन्नटीका श्रुतिमञ्जुसूक्तिः।
गीतेव कृष्णाननसौरभज्ञा
    ध्येयाऽसि मातः शुभयोगभाजाम्॥ **21.28** ॥

घनमहा नवनीतहृदाश्रित -
    व्रजविपत्तिहरा हरिवल्लभे।
प्रबलभद्रविकास विधायिनी
    त्वमयसे निजवल्लभतुल्यताम्॥ **21.29** ॥

प्रायोध्यानगरीयसां सुमनसां मायातमश्छेदिनी
　　त्वं काञ्चीमधुरावलग्नसरणिः क्षोभादवन्ती जगत्।
सम्भोगैः स्वदसे स्म देवि जलधेरुद्वीचिकाशीकरे
　　स्वैरं द्वारवतीपुरे विहरते कृष्णाय तृष्णायतैः॥ **21.30** ॥

म्लेच्छान् भयानकरवानपि मूर्च्छयित्वा
　　निर्वापयिष्यति कलिं हरिरध्वरं च।
कल्की तमांसि परिपास्यति भूसुरांश्च
　　पद्मे भवद्वचनपल्लवितानुकम्पः॥ **21.31** ॥

मलिनकलिकालेशैः शाखापरिक्षयदूषितैः
　　अपगतसदामोदैरत्रासुहृद्यवनैर्वृते।
शमयितुमनाः शाखिग्लानिं भविष्यति माधवः
　　जलनिधिभुवा वृद्धिं लब्ध्वा त्वया च महावनी॥ **21.32** ॥

वातव्रात इवावधूतकलिको मातर्महारण्यवत्
　　खड्गी तापसवत्कृतार्थ जननः कल्की मुधे देवि ते।
अम्लेच्छां स्वयमाचरिष्यति महीमान्ध्रीयजिह्वामिव
　　स्वामी स श्रुतिमार्गगानिह जनान् कर्ताथ शब्दानिव॥ **21.33** ॥

मात्स्यज्योतिषि मन्दरक्षणपरेऽनन्तोच्चहर्षावहे
　　हर्यास्यस्पृशि चारुवर्णिनि कृताशेषाधिकोपक्रिये।
एणश्रीमुषि कामपालविभवे कृष्णे कलिध्वंसने
　　देवि त्वद्दयितावतारदशकं ध्यायाम्यपाङ्गे तव॥ **21.34** ॥

कृष्णः केशो दृगेषा झषतनुरधरो मन्दरागं हि धत्ते
　　सौकर्यं दोष्ण्युरेजे किल मुखहरिता मध्यमात्ता वलिश्रीः।
रामाग्र्यत्वं नितम्बः प्रथयति यमुनादर्पहृद्रोमवल्ली
　　धत्ते जङ्घाभिरामश्रियमिह कलिहृत्पादपद्मं तव श्रीः॥ **21.35** ॥

विदितगुणालङ्करणं
    विचित्र रचना विचक्षण प्रेक्षम्।
कविमिव कृतदशरूपकम्
    अरविन्दगृहेऽभिनन्दसि मुकुन्दम्॥ **21.36**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे दशावतारस्तबकः एकविंशः॥